Golden Jubilee of India's Independence Series-19

# SOCIO-ECONOMIC IDEAS IN ANCIENT INDIAN LITERATURE



A.R. PANCHAMUKHI

RASHTRIYA SANSKRIT SANSTHAN

# भूमिका

स्वतन्त्रव्यक्तित्वयुक्तः सनातनसंस्कृतिसम्पन्नः विश्वस्य प्राचीनतमः जगन्मण्डलस्य क्षेममाकाङ्क्षमाणः भारतम् इति नाम्ना सुप्रसिद्धो अस्माकं महान् देशः 'सर्वे भद्राणि पश्यन्त सर्वे सन्तु निरामयाः' 'लोकाः समस्ताः सुखिनो भवन्तु' इति च भूमण्डले विराजतेतमाम्। देशेऽस्मिन् लब्धजन्मभिः मननशीलैर्मुनिभिः तत्त्वद्रष्टृभिर्महर्षिभिः योगध्यानपरायणैर्योगिभिः तपोनिष्ठैस्तापसैः जिज्ञासुभिस्तत्त्वज्ञानिभिरन्यैर्विद्वद्वरेण्यैश्च न केवलं धर्माधर्मविधिनिषेधानां आध्यात्मिकविषयाणां तत्त्वज्ञानमार्गस्य च उपदेशो वा प्रचारो वा कृतः किन्तु ज्ञानविज्ञानयोर्विभिन्नेषु क्षेत्रेषु महत्कार्यं कृतं यत्फलस्वरूपं तैर्महान्तस्सिद्धान्ता आविष्कृताः बहूनि तत्वानि प्रकाशितानि च। एतैः प्राचीनैः ऋषिभिर्मुनिभिश्च याः विभिन्ना अनुभूतयः प्राप्तास्तास्सर्वा अपि संस्कृतवाङ्मयस्य वेदादिविभिन्नशाखासु प्रकाशिताः। एवं विश्वस्य प्राचीनतमं संस्कृतवाङ्मयं मानवजातेरक्षयज्ञाननिधिरूपेण दरीदृश्यते।

वाङ्मयं खलु तत्तत्कालिकजनजीवनस्य प्रतिबिम्बतयाऽङ्गीकृतं मनीषिभिः (Literature is a mirror of the Society)। संस्कृतवाङ्मयाङ्गभूतेषु वेदवेदाङ्गस्मृतिपुराणेतिहासकाव्यनाटकादिषु धर्मस्य, दर्शनस्य, इतिहासस्य भूगोलस्य, राजनीतेः, समाजशास्त्रस्य, अर्थशास्त्रस्य भौतिकशास्त्रस्य, रसायनशास्त्रस्य, आयुर्वेदज्योतिश्शास्त्रयोरन्येषामनेकेषां विषयाणां च समन्वयं सम्पश्यामः। तत्रानेकानि वैज्ञानिकानि तत्वानि प्रकाशितानि सन्ति यानि अद्यतनीयमानवसमाजस्य कृते वैज्ञानिकचिन्तनपथप्रदर्शनायाद्यापि समर्थानि सन्ति। संस्कृतवाङ्मये प्रतिपादितानां वैज्ञानिकानां विषयाणामन्येषां विविधविषयाणां च ज्ञानेन सुष्ठु प्रयोजनं सम्पादयितुं प्राचां बहुमुखप्रतिभामवगन्तुं च संस्कृतवाङ्मयस्य अध्ययनमावश्यकम्। संस्कृतवाङ्मयरूपनिधिना आकर्षिता ह्यनेके आधुनिकविज्ञानिनस्संशोधकाश्च एतन्निधिनिगूढानि रत्नान्युपलब्धुं वाङ्मयशेवध्युत्खननस्यावश्यकतां ज्ञात्वा तत्कार्यप्रवृत्तास्सन्ति।

# CONTENTS


| | | |
|---|---|---|
| | Foreword | iii |
| | भूमिका | v |
| 1. | Agriculture | 1 |
| 2. | Animals | 75 |
| 3. | Plants | 248 |
| 4. | Forests & Gardens | 318 |
| 5. | Food and Drinks | 350 |
| 6. | Food Purity and Mind | 386 |
| 7. | Food-Storage, Consumption & Donation | 414 |
| 8. | Education in Ancient India | 433 |
| 9. | Environmental Awareness | 467 |
| 10. | Money and Bribery | 512 |
| 11. | Tobacco and Smoke-Inhaling | 538 |

(x) न्यासभूतं तदा न्यस्तमस्माकं पूर्वकं विभो।
अथ मे कृषतः क्षेत्रं लाङ्गलादुत्थिता मम ॥ 13 ॥
क्षेत्रं शोधयता लब्ध्वा नाम्ना सीतेति विश्रुतः।
भूतलादुत्थिता सा तु व्यवर्धत मयात्मजा ॥ 14 ॥

—रामा. I-66.

This is an example for even kings doing agriculture.

(xi) आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः। —कौ. अर्थशास्त्र 1-2.

Kautilya says that among other knowledges like आन्वीक्षिकी etc. king should know about agriculture also.

(xii) षट्कर्मनिरतो विप्रः कृषिकर्म च कारयेत्। –पा. स्मृति 2-2

(xii) षट्कर्मसहितो विप्रः कृषिवृत्तिं समाचरेत्।—बृहत् पा. स्मृ. 5-2.

(xiv) ब्राह्मणस्तु कृषिं कुर्वन् वाहयेदिच्छया धराम्। –5-150.

(xv) क्षत्रियोऽपि कृषिं कृत्वा देवान् विप्रांश्च पूजयेत्। पारा. 2-18.

(xvi) क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः। —याज्ञ. 3-2-35

(xvii) कृषिकर्म च वाणिज्यं वैश्यवृत्तिरुदाहृता। —पा. 1-64.

(xviii) वैश्यः शूद्रस्तथा कुर्यात् कृषिवाणिज्यशिल्पकम्।

—पा. 2-19.

From the above quotations from no. (xii) to (xviii) it is clear that the people of all four varṇas were eligible in one or the other circumstances to do agriculture.

**(xix)** उभाभ्याम् उपजीवंस्तु कथं स्यादिति चेद्भवेत्।
कृषिगोरक्षमास्थाय जीवेद् वैश्यस्य जीविकाम् ॥ मनु. 10-82.



RASHTIRYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri,
New Delhi-110058